संस्कृतप्रतीकनाटकेषु दर्शनतत्त्वविमर्शः

Philosophical Aspects in Sanskrit Allegorical Dramas

राँची विश्वविद्यालयतः पीएच. डी. (Ph.D.) इत्युपाधये समर्प्यमाणेयं शोधसंक्षिप्तिका

A Synopsis submitted for the Award of Doctor of Philosophy in Ranchi University, Jharkhand

मानविकी संकाय
स्नातकोत्तर संस्कृतविभागः
राँची विश्वविद्यालयः, राँची
वर्षम् - २०२४

मार्गनिर्देशिका

डॉ. हिमावती विन्हा
सहायकाचार्या, संस्कृतविभागः
जगनगनाथ नगर महाविद्यालयः
धूर्वा, राची - ४

अनुसन्धाता

सौरभ-गोस्वामी

संस्कृतप्रतीकनाटकेषु दर्शनतत्त्वविमर्शः

<u>संस्कृतप्रतीकनाटकेषु दर्शनतत्त्वविमर्शः</u>

उपक्रमः –

यद्यपि संस्कृतसाहित्यम् अतिविशालशास्त्रं तथापि साहित्यशास्त्रे, नाट्यशास्त्रे वा संस्कृतनाटकानां सुव्यवस्थितं वर्गीकरणम् कुत्रापि नोपलभ्यते। नाट्यग्रन्थेषु विशालनाट्यसाहित्यस्य केवलं रूपकोपरूपकभेदेन वर्गीकरणं प्राप्यते। दशरूपककारानुसारं रसाश्रितदशरूपकानां वस्तु-पात्र-रसरूपकैः त्रिभिः भेदकतत्त्वैः नाटकानां वर्णत्रयं निर्दिष्टम्। तद्यथा वस्तुप्रधानं घटनाप्रधानं वा, पात्रप्रधानं, रसप्रधानं चेति।



प्रतीकात्मक नाटकेषु वा रूपकात्मकनाटकेषु तानि नाटकानि अन्तर्भवन्ति येषु अमुर्तानां तत्त्वानां मूर्तरूपेण कल्पना क्रियते। एतादृशेषु नाटकेषु श्रद्धा, भक्ति:, विवेकश्च इत्यादि अमूर्तानां तथा भाववाचकतत्त्वानां मूर्तपात्रतुल्यं नाटकीयस्वं परिकल्प्यते। एषु नाटकेषु वस्तु उत्पाद्यम्, आध्यात्मिकं मनोवैज्ञानिकं वा भवति। कदाचित् एतादृशेषु नाटकेषु सांसारिकाणां, सामाजिकानां, ऐतिहासिकानां वा घटनानां विनियोग: तथा च द्वित्राणां वास्तविकमात्राणां विनियोग: अपि क्रियते। प्रायश: एतानि नाटकाणि धार्मिकानि व्यङ्गप्रधानानि वा भवन्ति। प्रतीकनाटकानि एव छायानाटकानि भावनानाटकानि इत्यपि कथ्यते।

प्रतीक वस्तुत: आङ्गलभाषाया: “Symbol” इति शब्दस्य अनुवादरूपोऽर्थ:। यदि सुक्ष्मतया विचारयाम:, तर्हि पश्याम: यत् आङ्गलभाषाया: ‘Symbol’ इति पदं प्रतीकपदस्यार्थं सम्यकतया बोधयितुं नार्हति। अद्यत्वे प्रतीकशब्द: आङ्गलभाषाया: ‘Allegory’ इति शब्दस्य पर्यायत्वेन व्यवह्रियते। प्रतीकशब्दस्य व्युत्पत्ति: भवति प्रतीयते ज्ञायते वा इति प्रतीकम्। प्रति+इण+क्विप्। अत: प्रतीकशब्दस्य अर्थ भवति येन ज्ञायते तत् प्रतीकम्। अत: प्रतीकपदं मूर्तत्वेन सिद्धं भवति। अमूर्तानां भावानां व्यत्तित्वेन आरोप्य यदि नाटकरूपेण क्रियते तदेव रूपकं प्रतीकनाटकमुच्यते। तथा चोक्तं –

‘अमूर्तभावा: मूर्तप्राणिरूपतया कल्पिता:।’[1]

1. सं.सा.इ- बलदेव उपाध्याय, पृ.सं. ४९२

प्रतीकनाटकस्योत्पत्ति: कदा केन अभवत् इति कथने सन्देहो भवति। प्रतीकनाटकस्य परम्परा प्राचीना एव, परन्तु परवर्तिकाले अयं प्रवाह: विच्छिन्न: जात:। एकादशशताब्द्या: मध्यभागे कृष्णमिश्रष्य प्रबोधचन्द्रोदय-नाटकं अस्या: परम्पराया: पुनरुज्जीवनं अकरोत। परवर्तिकाले कवय: इमां शैलीमनुसृत्य प्रतीकनाटकस्य प्रवाहमवगाहितवन्त:। एतेषां कवीनां कृतीनामुल्लेख: अध: क्रियते। –

1. कृष्णमिश्रस्य प्रबोधचन्द्रोदयम्
2. यश:पालस्य मोहराजपराजयम्
3. वेदान्तदेशिकस्य संकल्पसूर्यादयम्
4. वरदाचार्यस्य यतिराजविजयम्
5. कविकर्णपुरस्य चैतन्यचन्द्रोदयम्
6. वादिचन्द्रसुरिना ज्ञानसूर्योदयम्
7. भूदेवशुक्लस्य धर्मविजयम्
8. श्रीनिवासदीक्षितस्य भावनापुरुषोत्तमम्
9. गोकुलनाथस्य अमृतोदयम्
10. आनन्दरायमखिना विद्यापरिणयम्
11. आनन्दरायमखिना जीवानन्दनम्
12. शिवकविना विवेकचन्द्रोदयम्
13. वरदाचार्यस्य वेदान्तविलास:
14. कृष्णदत्तमैथिलेशेन पुरञ्जनचरितम् इति च।

संस्कृतसाहित्येषु सर्वप्रतीकनाटकान्यवलम्ब्य यदि कार्यं क्रियते तर्हि ग्रन्थस्यास्याकारो महान् स्यादिति भिया निरस्त:। अतोऽस्मिन् शोधग्रन्थे यश:पालस्य 'मोहराजपराजयम्', वेङ्कटदेशिकस्य 'संकल्पसूर्योदयम्', कविकर्णपुरस्य 'चैतन्यचन्द्रोदयम्', गौकुलनाथस्य 'अमृतोदयम्', आनन्दरायमखिना 'जीवानन्दनम्' इत्येतानि पञ्चसंस्कृतप्रतीकनाटकान्यवलम्ब्य दर्शनतत्त्वविमर्श: विधीयते।

A] यश:पालस्य मोहराजपराजयम् : जैनकवि: यश:पाल: प्रबोधचन्द्रोदयमनुसृत्य 'मोहराजपराजयम्' शीर्षकं पञ्चांकं नाटकं रचितवान्। जैनाचार्य-हेमचन्द्रस्य प्रभावात् चालुक्यराजस्य जैनधर्मे दीक्षाग्रहणं नाटकस्य प्रधानं वृत्तम्। नायक: कुमारपाल आचार्यस्य कृपाबलेन योगशास्त्ररूपेण अस्त्रेण सज्जित: सन् मोहनृपतिमवरुध्य स्वयं मुक्तिं लभते। मोक्षप्राप्तिप्रसङ्गे पञ्चमाङ्के उक्तम्–

"जिनशासनप्रभावविषयोपनिषन्निषण्वाहृदयस्य
अस्य नृपस्य व्यसने सान्निध्यं को न विदधाति॥"[2]

B] वेङ्कटदेशिकस्य संकल्पसूर्योदयम् : चतुर्दशशताब्द्यां वेदान्तदेशिकेन दशाङ्कविशिष्टम् 'संकल्पसुर्योदयम्' नाटके विशिष्टाद्वेतवेदान्तस्य प्रचारं दृश्यते। नवमाङ्के किञ्चिद् विशिष्टाद्वैततत्त्वमुद्घाटितं वर्तते –

"अधराहित चारुवंशनाला:
मकुटालम्बिमयूर पिञ्छमाला:।
हरिनीलशिलाविभङ्गनीला: प्रतिभा:

2. मोहराजपराजय - ५/७४

सन्तु ममान्तिमप्रयाणे॥”[3]

C] कविकर्णपुरस्य चैतन्यचन्द्रोदयम् – दशाङ्कविशिष्टं चैतन्यचन्द्रोदयस्य मुख्यप्रतिपाद्यविषय: चैतन्यदर्शनम् तथा वैष्णवधर्मस्यप्रचार:। नाटकस्य विष्कम्भकानन्तरं भगवदादेशेन श्रीवासस्य पुनर्जीवनवृत्तान्त: सूच्यते एवं मुरारे: ज्ञानचर्चार्थं महाप्रभोराक्षेप: वर्णित:। महाप्रभोरुक्ति: अमृतसागरेण भक्तियोग: खातकेन हेयरूप: संसार: उच्यते। तद्यथा –

“यस्य भक्तिर्भगवति हरौ नि:श्रेयसेश्वरे।

विक्रीडितोऽमृताम्भोधौ किमन्यै: खानकोदकै:॥”[4]

D] गोकुलनाथस्य अमृतोदयम् – पञ्चाङ्कविशिष्टं नाटकेऽस्मिन् न्याय-वैशेषिकदर्शनस्य प्रचारं दृश्यते। जगतोत्पत्तिप्रसङ्गे उक्तम् –

“विषमनिगमकाननान्तशाखाततिषु निलीय परान्निरीक्षमाण:।

परिणतिविदलज्जगत्कपित्थग्रसनकपे सुचिरान्निरुपितोऽसि॥”[5]

E] आनन्दरायमखिना जीवानन्दनम् – सप्ताङ्कविशिष्टम् अस्मिन् नाटके आयुर्वेदशास्रस्य तत्त्वं रूपकायितम्। अन्ते ईश्वरानुग्रहेण पारदरसप्रयोगात् रोगमुक्तिं लब्धा जीवानन्दनमुपगच्छति जीवात्मा। अस्मिन् नाटके षष्ठाङ्के अद्वेतवेदान्ततत्त्वं उद्घाटितं वर्तते। –

“जगत्प्रोतं यस्मिन्विविध इव सूत्रे मणिगण:

3. संकल्पसूर्योदयम् - ९/३३

4. चैतन्यचन्द्रोदयनाटकम् - १/५३

5. अमृतोदय - १/२४

समस्तं यद्भासा तदपि च विभाति स्फुटमिदम्।

अखण्डानन्दं यन्निरवधिकसञ्चित्सुखमयं

निराकारं यत्तत्त्वमसि परमं ब्रह्म न पुमान्॥”[6]

शोधविषयचयनहेतु: – प्रतीकनाटकान्यवलम्ब्य वहुगवेषकै: पृथक्पृथकरूपेण विविधविषयमाश्रित्य वहुकार्यं कृतम्। किन्तु पञ्चप्रतीकनाटकान्यवलम्ब्य साकल्येन दर्शनतत्त्वविमर्श: कुत्रापि केनापि न आलोचितम्। अस्माकं संस्कृतसाहित्यं बहुसमृद्धम्। अत: तत्र दर्शन-व्याकरणादे: वैचित्र्यम् प्रायश: परिलक्ष्यते। भारतीयदर्शनप्रतिपादिततत्त्वानां सार्थकविचारविमर्शपूर्वकं पञ्चप्रतीकनाटकेषु तेषां तत्त्वानां विचारविश्लेषणाभ्यां प्रतिपादनं खलु अस्य शोधकार्यस्य विषय:। दार्शनिकतत्त्वं प्रति मम अभिरुचि: बहुकालादेव। अत: पञ्चप्रतीकनाटकेषु दार्शनिकभावनाविश्लेषणे मम प्रवृत्ति:।

शोधविषयचयनप्रयोजनम् – अनेन शोधकार्येण यथा प्रतीकनाटकाणांस्वरूपम् प्रस्फुटितं भविष्यति, तथैव तेषु नाटकेषु प्रतिपादितविषयाणां मध्ये दार्शनिकतत्त्वानुधावनेन ‘चतुर्वर्गफलप्राप्ति: सुखमल्पधियामपि’ इति विश्वनाथप्रतिपादितसिद्धान्तस्य सार्थकतया प्रतिपादनं भविष्यति। दर्शनशास्त्रं मोक्षस्य द्योतकम्। किन्तु सुखेन मोक्षलाभाय काव्यशास्त्रमेव श्रेष्ठम्। अनेन शोधप्रबन्धेन विषयोऽयं स्पष्टं भविष्यति इति मन्ये। एतेन शोधकार्येण परवर्तिगवेषका: समृद्धा: भविष्यन्ति इति मम मति:।

---

6. जीवानन्दनम् - ६/२४

सामग्रीसमुपलब्धि: – शोधविषयानुसारं सामग्रीं विना अनुसन्धाता शोधकार्येषु अग्रसरभवितुं तथा च एकमपि वाक्यं लिखितुं न शक्नोति। एतस्मै सामग्रीसंकलनाय विविधानि स्रोतांसि लोच्यन्ते। अतएव शोधकार्येऽस्मिन् सामग्रीसंकलनाय गृहीतानां स्रोतसां स्वरूपं निम्नरूपं, यथा –

(१) प्राथमिकस्रोत: – प्राथमिकस्रोतरूपेण शोधविषयस्य मूलग्रन्था: स्वीकृता: मया।

(२) आनुषङ्गिक स्रोत: – आनुषङ्गिकस्रोतरूपेण रांचीविश्वविद्यालयस्य ग्रन्थालयात् सम्बन्धितविविधमूलग्रन्था: व्याख्या-टीका-भाष्य-वृत्तिग्रन्था: शोधपत्रिका: शोधलेखा: कोशग्रन्थाश्च स्वीकृता: मया।

(३) आधुनिकस्रोत: – अन्तर्जालत: प्राप्तानि सम्बद्धतत्त्वानि स्वीकृतानि। इ-कोशा:, इ-शोधपत्रिका:, शोधगङ्गा चेत्येतस्योपयोगं करिष्याम्यहम्।

इतोऽपि तथ्यान्वेषणाय विषयनिष्णातगणैस्यार्धं सम्पर्क: साधित: मया।

शोधप्रबिधि: – अनुसन्धानक्षेत्रे उच्चावचा: शोधरीतयो: दरीदृश्यन्ते। परन्तु शोधप्रबन्धस्याऽस्य आलोचनापद्धतिदिशा ये ये शोधरीतय: अनुसृता: शोधप्रबन्धेऽस्मिन् भविष्यन्ति, ते तावत्– व्याख्यात्मकप्रबिधि:, समीक्षात्मकप्रबिधि:, वर्णनात्मकप्रबिधि:, अन्वेषणात्मकप्रबिधि:, परिशोधात्मकप्रबिधि:, तुलनात्मकप्रबिधि: च। पुनश्च शोधप्रबन्धेऽस्मिन्निष्पक्षपातत्या आत्मनिष्ठतया नैतिकतया सारल्येन च सविमर्शं यथामति तथ्यानां विश्लेषणं करिष्याम्यहम्।

शोधप्रवन्धस्य अध्यायविभाजनक्रम: –

संकेतसूची

भूमिका

प्रथमोऽध्याय: – प्रतीकशब्दस्य विवेचनम्

- वैदिकवाङ्मये प्रतीकशब्दस्य विवेचनम्
- लौकिकवाङ्मये प्रतीकशब्दस्य विवेचनम्

द्वितीयोऽध्याय: – प्रतीकनाटकानामभ्युदय: क्रमविकाशश्च

- प्रतीकनाटकानाम् उद्भव:
- प्रतीकनाटकानां क्रमविकाश:

तृतीयोऽध्याय: – पञ्चप्रतीकनाटकानां सम्यक्परिचय:

- मोहराजपराजयम्
- संकल्पसूर्योदयम्
- चैतन्यचन्द्रोदयम्
- अमृतोदयम्
- जीवानन्दनम्

चतुर्थोऽध्याय: – पञ्चप्रतीकनाटकानां नाट्यतत्त्वस्य वैशिष्टस्य संक्षिप्तालोचनम्

- मोहराजपराजये नाट्यतत्त्वस्य संक्षिप्तालोचनम्
- संकल्पसूर्योदये नाट्यतत्त्वस्य संक्षिप्तालोचनम्
- चेतन्यचन्द्रोदये नाट्यतत्त्वस्य संक्षिप्तालोचनम्
- अमृतोदये नाट्यतत्त्वस्य संक्षिप्तालोचनम्
- जीवानन्दने नाट्यतत्त्वस्य संक्षिप्तालोचनम्

पञ्चमोऽध्याय: – पञ्चप्रतीकनाटकेषु दर्शनतत्त्वविमर्श:

- मोहराजपराजये दर्शनतत्त्वविमर्श:
- संकल्पसूर्योदये दर्शनतत्त्वविमर्श:

- चैतन्यचन्द्रोदये दर्शनतत्त्वविमर्श:
- अमृतोदये दर्शनतत्त्वविमर्श:
- जीवानन्दने दर्शनतत्त्वविमर्श:

उपसंहार:

परिशिष्टम्

सन्दर्भग्रन्थसूची

सन्दर्भग्रन्थसूची

॥हिन्दीग्रन्था:॥

१. त्रिपाठी आशारानी, संस्कृत के प्रतीकात्मक नाटक एक अध्ययन, वाराणसी, विश्वविद्यालय प्रकाशनम्, २००३ (प्रथम संस्करणम्)।

२. मीणा राजेश, संस्कृत के रूपककथात्मक नाटकों का धार्मिक एवं दार्शनिक विवेचन (११ वींशती से १६ वींशती पर्यन्त), वाराणसी, मनीष प्रकाशनम्, २०१४ (प्रथम संस्करणम्)।

३. चतुर्वेदी सीताराम, अभिनव नाट्यशास्र, अखिल भारतीय विक्रम परिषद्, काशी संस्करणम्, २००८।

४. त्रिपाठी कृष्णकान्त, संस्कृत के रूपक कथात्मक नाटक, कानपुर, १९७६।

५. उपाध्याय बलदेव, संस्कृत साहित्य का इतिहास:, काशी, १९५८।

६. त्रिपाठी कृष्णकान्त, प्रबोधचन्द्रोदय एवं संस्कृतप्रतीक परम्परा, कानपुर, १९७०।

७. त्रिपाठी राधावल्लभः, संस्कृत साहित्यका अभिनव इतिहासः, वाराणसी, विश्वविद्यालयप्रकाशनम्, २०१३ (तृतीय संस्करणम्)।

॥<u>कोषग्रन्थाः</u>॥

१. सिंहः अमरः, अमरकोषः; सम्पा. ब्रह्मानन्दत्रिपाठी, वाराणसी, चौखम्बा सुरभारती प्रकाशनम्, २०१५ (संस्करणम्)।

२. बाहादूरः राधाकान्तः, शब्दकल्पद्रुमः; सम्पा. वरदाप्रसादवसुः हरिचरणवसुः, वाराणसी, चौखाम्बासुरभारतीप्रकाशनम्, २०१५।

३. भट्टाचार्यः तारानाथः, वाचस्पत्यम्; सम्पा. गजपतिराजः, वाराणसी, चौखाम्बासंस्कृतसिरिज अफिस, १९६२

॥<u>संस्कृतग्रन्था</u>॥

१. मम्मटः, काव्यप्रकाशः, (झालकिकरटीकासहितः); वाराणसी, चौखाम्बा सुरभारती प्रकाशनम्, २०१३ (प्रथम संस्करणम्)।

२. पण्डा ज्ञानरञ्जन, प्रबोधचन्द्रोदयसंकल्पसूर्यदययोः तुलनात्मकमध्ययनम्, निरुपतिः, राष्ट्रीयसंस्कृतविद्यापीठम्, २०११ (प्रथम मुद्रणम्)।

३. कविकर्णपुर, चैतन्यचन्द्रोदयनाटकम् (‘प्रकाश’ हिन्दीव्याख्योपेतम्), व्याख्याकारः रामचन्द्रमिश्रः, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस, २०१३ (प्रथमसंस्करणम्)।

४. श्रीवेंकटनाथः, संकल्पसूर्योदयः (प्रभाविलासः प्रभावल्याख्यया च व्याख्यया समेतः), वे. कृष्णमाचार्य, मद्रपुरी, अडयार्पुस्तकालयः, १९४८।

५. यश:पाल:, मोहराजपराजयम्, सम्पा. मुनि: चतुरविजयजी, वरोदा, सेण्ट्राल लाइव्रेरी, १९१८।

६. आनन्दरायमखि:, जीवानन्दनम् (काव्यमाला २७), मुम्बइ, निर्णयसागरप्रेस, १८९१।

७. गोकुलनाथ, अमृतोदय, सम्पा. रामचन्द्र:मिश्र:, वाराणसी, १९६४।

८. वन्द्योपाध्याय: धीरेन्द्रनाथ:, संस्कृतसाहित्यस्य इतिहास:, कलकाता, पश्चिमवङ्गराज्यपुस्तकपर्षद्, २०१२ (द्वितीयसंस्करणम्)

॥<u>आङ्गलग्रन्था:</u>॥

1. A. A. Macdonell, History of Sanskrit Literature, Munshi Ram Manohar Lal Oriental & Foreign Book Sellers, Delhi- 6, 1958.

मार्गनिर्देशिका

डॉ. हिमावती विन्हा
सहायकाचार्या, संस्कृतविभाग:
जगनगनाथ नगर महाविद्यालय:
धूर्वा, राची - ४

अनुसन्धाता

सौरभ-गोस्वामी